International Journal of Applied Research 2016; 2(11): 506-508




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(11): 506-508
www.allresearchjournal.com
Received: 12-09-2016
Accepted: 13-10-2016

**कल्पना**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेश,
भारत

**Correspondence**
**कल्पना**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेश,
भारत

# पाणिनिव्याकरणोदाहरणार्थविषये प्रचलिताः भ्रान्तयः

## कल्पना

भूमण्डले सर्वप्रथमः ग्रन्थः ऋग्वेदः मन्यते इति सर्वे पाश्चात्यविद्वांसोऽपि ऐकमत्येनाङ्गीकुर्वन्ति। रशियादेशे मास्कोनगरे विश्वस्य बृहत्तमः पुस्तकालयो अस्ति। तस्य प्रवेशद्वारे ऋग्वेदग्रन्थ स्थापितोऽस्ति। तस्य पार्श्वभागे च लिखितं यत् अयं ग्रन्थः संसारस्य सर्वप्रथमं प्राचीनतमश्च ग्रन्थोऽस्ति। इत्थं वेदरूपेणैव धरायां सर्वप्रथमं ज्ञानालोकः प्रसृतो बभूव। तथा चाह महर्षिः कृष्णद्वैपायनो व्यासः–

अनादिनिधनानित्या वागुत्सृष्टा स्वयंभुवा।
आदौ वेदमयी दिव्या यतस्सर्वा प्रवृत्तयः[1]।।

अर्थात् सर्गादौ परं कारुणिको जगदीश्वरः ऋषीणामवदात्तचेतसां हृदि वेदमयीं वाणीं विद्यां च प्रकाशयांचक्रे। तामाश्रित्यैव संसारे सर्वविधाः ज्ञानप्रवृत्तयः प्रावर्तन्त। इमां कल्याणीं वेदवाणीमनुसृत्यैव मनुष्यो वस्तुतः मनुष्यतां प्राप्नोति। वैदिकीं संस्कृतिमङ्गीकृत्यैव स अभ्युदयनिःश्रेयसरूपं ऐहिकं पारलौकिकं च मङ्गलं साधयितुं समर्था इयमेव वेदप्रतिपादिका संस्कृतिः प्रथमा विश्ववारा संस्कृतिररुच्यते।

वेदाः खलु संस्कृतभाषा निबद्धास्सन्तीति। संस्कृतभाषैव विश्वस्य प्रथमा प्राचीनतमा च भाषा अस्तीति सर्वसम्मतं मतम्। संस्कृतभाषायाः व्याकरणमपि सर्वव्याकरणभाषाभ्यः प्राचीनतममतिसमृद्धं सुव्यवस्थितमतिवैज्ञानिकं चास्ति। व्याकरणं खलु भाषानुसारि भवति। शिष्टजनैः प्रयुज्यमानाः भाषैव व्याकरणस्याधारभूता भवति। तयैव सर्वेऽपि व्यवहाराः प्रवर्तन्ते। तथा चोक्तम्–

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते[2]।।

तथा चोक्तं भर्तृहरिणा–

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते[3]।।

भाषा च शब्दसमूहरूपा भवति। शब्दानां साधुत्वस्य अन्वाख्यानाय शब्दानुशासनं नाम शास्त्रं प्रवृत्तम्–

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेने शिष्टानामिदं स्मृतिनिबन्धनम्[4]।।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्। व्याकरणेन खलु प्रवृतिप्रत्ययविभागकल्पनया सामान्यविशेषवता च लक्षणेन शब्दानां साधुत्वानुशासनं क्रियते। व्याकृतिरिति विभाग उच्यते। स च प्रकृतिप्रत्ययरूपा प्राधान्येन अस्ति। व्याकरणशास्त्ररचनायाः परम्परा अति प्राचीना अस्ति। तत्र प्रथमः व्याकरणस्य प्रणेता इन्द्रो मन्यते। तथा चोक्तम्–

वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति.... तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्[5]।।

महाभाष्येऽपि कथितम्–

बृहस्पतिरिन्द्राय वर्षसहस्रं शब्दपारायणं प्रोवाच न चान्तं जगाम। बृहस्पतिश्च प्रवक्ता इन्द्राश्चाध्येता दिव्यं वर्षसहस्रं चाध्ययनकालं न चान्तं जगाम[6]।

साधुशब्दानाम् अनुशासकं व्याकरणशास्त्रमिदम्। व्याकरणस्य मुख्यं प्रयोजन– व्यवहारे साधुशब्दानां प्रयोगो भवेत्। यथोक्तम्–

व्याकरणात् पदसिद्धिः पदसिद्धेरर्थनिर्णयो भवति।
अर्थात्तत्त्वज्ञानं तत्त्वज्ञानात् परं श्रेयः[7]।।

अर्थात् व्याकरणज्ञानात् पदज्ञानं, पदसिद्धिज्ञानात् अर्थनिर्णयः अर्थात् तत्त्वज्ञानं, तत्त्वज्ञानात् परमश्रेयः मुक्तिर्जायते।
अद्यत्वे प्रक्रियापूर्वकपदसिद्धिरेव मुख्यत्वमावहति पाणिनीयव्याकरणस्य अध्ययनाध्यापनपरम्परायाम्। परं व्याकृतस्य पदस्य कोऽर्थः कथं वा तस्य वाक्ये प्रयोग इत्येतदर्वाचीनवैय्याकरणपरम्परायां प्रायेणोपेक्षमाणः गुणीभूतो वा जातम्। शैथिल्यमिदं केवलं नाद्यत्वे परं अनेकेभ्यः वर्षशतकेभ्यः प्रवृत्तमस्ति। पुरा तु त्रिमुनिव्याकरणस्यास्य प्रणयनकाले प्रणेतॄणामाचार्याणां समक्षम् उदाहरणानामर्थाः प्रयोगश्च स्पष्टमेवासीत्। यतः भाषायां शब्दप्रयोगं दृष्ट्वैव तत्साधुत्वानुशासनं क्रियते इत्याचार्याणां शैली। तथापि मुनित्रयस्य कालादनन्तरं यथा यथा संस्कृतभाषाया व्यवहारो विरलतां गतः तथा तथा शब्दसिद्धिप्रक्रियायामविच्छिन्नायां सत्यामपि सूत्रैः व्याकृतानां बहूनामुदाहरणपदानाम् अर्थः प्रयोगश्च सन्दिग्धतामस्पष्टतां वा गतः।
भाषा सतता परिवर्तमाना परिवर्धमाना च। सा काठिन्यं जहाति सारल्यं च स्वीकरोति। यदा भाषा लोकप्रिया सुसम्पन्ना च भवति तदा भाषाविदो भाषागतशब्दानामपभ्रंशेभ्यो रक्षणाय तेषां यथार्थस्वरूपपरिज्ञानाय च भाषाया व्याकरणमुपनिबध्नन्ति। व्याकरणस्य प्रधानं प्रवृत्तिनिमित्तम् इदमेव। लक्ष्यं लक्षणं चैतद् द्वयं समुदितं व्याकरणं मन्यते। अनया दृष्ट्या लक्षणैः सह लक्ष्याणाम् अध्ययनम् अपि अपरिहार्यं महत्त्वपूर्णं चास्ति । अस्मिन् शोधप्रपत्रे केषांचिद् विशिष्टोदाहरणानाम् अर्थप्रयोगयोर्विमर्शो विधीयते। यथा–

1. अत्र सम्प्रत्युपलभ्यमानेषु काशिकापुस्तकेषु 'तृतीया तत्कृतार्थेन गुणवचनेन' सूत्रेऽस्मिन् क्रमेणैतद् उदाहरणयुगलं प्रदर्शितमस्ति।(1) शंकुलाखण्डः (2) किरिकाणः
अनयोः वास्तविकार्थः कः, कथं वा वाक्ये प्रयोगः? इति कश्चिदेव जानीयात्। वास्तविकस्यार्थस्य स्थाने भ्रान्तियुक्तोऽर्थः प्रचलितोऽस्ति किरिकाणः उदाहरणमिदं विवेचनीयमस्ति। किरिणा काणः किरिकाणः। अत्र कृगृशृपृकुटिभिदिच्छिदिभ्यश्च[8] इत्यौणादिकसूत्रेण कृधातोः 'इः' प्रत्यये कृते सति किरिरिति शब्दः निष्पन्नः स च शूकरपर्यायः। किरति विक्षिपति भुवमिति किरिः सूकरः[9]। तेन किरिकाणः सूकरेण कृतः काण इत्यर्थो लभ्यते। परं पाणिनीयेतरव्याकरणसम्प्रदायस्य परम्परायां ग्रन्थेषु अद्यापि 'गिरिकाणः' अयं पाठ एव लभ्यते। जैनेन्द्रव्याकरणमहावृत्तौ,[10] शाकटायनव्याकरणस्य चिन्तामणिवृत्तौ[11], मलयगिरिशब्दानुशासने सवृत्तिके[12], हैमप्रक्रियाप्रकाशमहाव्याकरणे[13], प्रयोगरत्नमालाव्याकरणे[14] च गिरिकाण इति पाठ एवोपलभ्यते। चान्द्रवृत्तिः काशिकातः पूर्वा। तत्रापि अयमेव पाठः दृश्यते। चान्द्रवृत्तौ[15] अपि गिरिणा काणः गिरिकाणः (काणादिभावे गिर्यादीनां करणत्वात्)। कातन्त्रपरिशिष्टे[16] गिरिर्नाम क्रीडनकं, तेन काणो गिरिकाणः। अनेन ज्ञायते यत् काशिकातः पूर्वमपि अस्य सूत्रस्य इदमेवोदाहरणं प्रसिद्धमासीत्।
यथा शंकुलाखण्डः–(सरोते के द्वारा किया हुआ खण्ड), किरिकाणः– (सूअर द्वारा काणा किया हुआ) ब्रह्मदत्तजिज्ञासुविरचितप्रथमावृत्तौ एवंभूतावर्थौ प्रतिपादितौ।
अर्थद्वयमपि अतीव भ्रान्तिपूर्णमशुद्धं च। मूलार्थः एवम्– शंकुला राजस्थाने ग्रामीणक्षेत्रे प्रचलितभाषानुसारेण खुलिया (हॉकी) इत्यस्ति। एवं शंकुलाखण्डः– खुलिया द्वारा घायल किया गया व्यक्ति। शंकुला (हॉकी) खलु भारतस्य प्राचीना क्रीडा। यदा वयं क्रीडामिमां कुर्मः चेत् प्रायशः एवं भवति स्म एव। एवं शंकुलाखण्डः शब्दोऽयं (खुलिया द्वारा घायल किया गया) अर्थेऽस्मिन् प्रचलितः। प्रमाणमस्य वयं द्वादशशताब्द्याम् आचार्यहेमचन्द्ररचितेन द्व्याश्रयमहाकाव्ये स्पष्टतया पश्यामः। अस्मिन् संदर्भे एव प्रयोगोऽयं कृतोऽस्ति।
एवमेव सम्प्रति प्रचलितः किरिकाणः उदाहरणमिदमपि वस्तुतः 'गिरिकाणः' इत्यासीत्। अस्यार्थः गिरिणा काणः पुरुषः (अर्थात् गिल्ली–डण्डा क्रीडा में गिल्ली से काणा हुआ व्यक्ति)। क्रीडा इयं पुराकाले दाण्डाक्रीडारूपेण प्रचलिता। इयमपि भारतस्य पुरातनी क्रीडा। गिरिशब्दस्यापभ्रंशरूपेण गिल्ली इति भाषायां प्रचलितः। आचार्यहेमचन्द्रस्तु गिरिशब्दं कन्दुकार्थं मत्वा प्रयुङ्क्ते–

दाण्डायां गिरिणा काणाः खण्डाः शंकुलया मिथः।
ग्राम्याः युवतयाऽनूना मुष्टिभिः कलहं व्यधुः[17]।।

युवतया यौवनेनानूना अहीना यौवनस्था ग्राम्या ग्रामीणदारका मुष्टिभिर्मिथः कलहं युद्धं व्यधुर्यतो दण्डः प्रहरणमस्यां प्रहरणात्क्रीडायां णः (6.2.116) इति णे दाण्डा शंकुलाकन्दुकक्रीडा। तस्यां गिरिणा कन्दुकेन कर्त्रा काणाः कृताः शंकुलागाढघातेनोर्ध्वमुच्छलितेन कन्दुकेनाक्ष्णो व्याघातात्। तथा शंकुलया वक्राग्रया क्रीडनयष्ट्या कत्र्या खण्डाः खण्डगुणोपेताः कृताः। मिथः प्रतिकूलमाहन्यमानात्कन्दुकात्स्खलितायाः शंकुलायाः पादेषु गाढप्रहारात्कुण्ठीकृता इत्यर्थः। शरदि हि पङ्कस्य शुष्कप्रायत्वाद्रजसश्चोत्थानाभावाद्दाण्डाक्रीडा प्रवर्तते इति अभयतिलकगणिटीका।
सम्प्रति मुद्रितकाशिकापुस्तकेषु महाभाष्यपुस्तकेषु च 'किरिकाणः' इति पाठो लभ्यते। शब्दकौस्तुभेऽपि एवमेवोदाहृतम्। अनेन ज्ञायते 'गिरिकाणः' इत्येव पाठः आसीत्। पश्चात्तु लिपिकारप्रमादकारणतः मुद्रणदोषाद्वा अयं पाठः अपपाठः भ्रष्टपाठः संजातः। केचित्तु किरिणा काणः किरिकाणः इति पठन्ति– यथा लघुसिद्धान्तकौमुद्याः भैमीव्याख्यायाम्[18] किरिणा काणः किरिकाणः (किरि नामक नेत्ररोग से काना हुआ) स नूनमपपाठ एव। आचार्यचारुदेवेन कृते व्याकरणचन्द्रोदये[19] अपि अयमेव पाठः। एतत् सर्वं भ्रान्तिविजृम्भितम्। गिरिकाण इत्येव परम्परागतं मूर्धाभिषिक्तमुदाहरणम्।

2.
पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापक– धूर्तैर्जातिः[20] इति सूत्रे सर्वत्र मुद्रितकाशिकापुस्तकेषु इभपोटेति उदाहरणं दृश्यते। वस्तुतः इदमुदाहरणस्य अशुद्धरूपमस्ति। एतस्य स्थाने 'इभ्यपोटा' इति शुद्धरूपं स्यात्। आधुनिकाः सम्पादकाः व्याख्यातारश्च इभपोटेति उदाहरणं मत्वा अर्थं प्रदर्शयन्ति। यथा चारुदेवशास्त्रिणा रचिते पुस्तके व्याकरणचन्द्रोदये, आचार्यसुदर्शनदेवकृतप्रथमावृत्तौ, पं. ब्रह्मदत्तजिज्ञासुकृतप्रथमावृत्तावपि इभपोटेति उदाहरणं दृश्यते। भट्टोजिदीक्षितप्रणीतायां सिद्धान्तकौमुद्याम्, व्याकरणसिद्धान्तसुधानिधौ अपि इभपोटेति उदाहरणस्य अयमेव पाठः प्रदर्शितः।
प्राचीनव्याकरणग्रन्थानामवलोकनेन तु उदाहरणस्य शुद्धस्वरूपं लभ्यते। पाणिनीयेतरव्याकरणपरम्परायां सिद्धहेमशब्दानुशासने चान्द्रवृत्तौ चापि 'इभ्यपोटा' इति पठ्यते। चान्द्रवृत्तिः तु प्रथमशताब्द्यां रचिता। एतस्मिन् पाठे मते सति इभमर्हति इभ्या धनाढ्या। इभ्या चासौ पोटा च इभ्यपोटा। इभ्यापोटेति उदाहरणस्यार्थं प्रदर्शयन्नाह– इभ्या च सा पोटा च इभ्यपोटा। आर्यपोटा। पुरुषवेषधारिणी स्त्री पोटा गर्भ एव दास्यां प्राप्ता वा उभयव्यंजना वा भुजिष्यदासी वा। इभ्या चासौ युवतिश्च इभ्ययुवतिः। अमरकोशेऽपि– पोटा स्त्रीपुंसलक्षणेत्यमरः। स्तनश्मश्रवादियुक्ता स्त्री तथेत्यमरव्याख्यातारः। एतेन स्पष्टं यत् अस्योदाहरणस्य शुद्धरूपं 'इभ्यपोटा' इत्येवास्ति। इदमेव स्वरूपं प्राचीनग्रन्थेष्वपि दृश्यते, प्राचीनप्रयोगा अपि सन्ति अस्मिन्नेवार्थे। तथा च प्रयोगाः–

नवमशताब्द्यां काश्मीरिकमहाकविभूमभट्टविरचिते अर्जुनरावणीये काव्ये–

जलाभिषेकाहितशीतकम्पा स्त्रीस्तोकभाजं सहसेभ्यपोटा।
उपेक्षमाणं नरधूर्तमन्या समालिलिङ्गाशु विमुच्य मानम्[21]।।

अन्या इभ्यपोटा उभयव्यंजना योनिस्तनमुखलोमादियुक्ता, इभ्या आढ्या प्रधानभूता केनापि हेतुना उपेक्ष्यमाणं काल्यमानं पुनः स्त्रीस्तोकभाजमल्पस्त्रीपरिग्रहं वरधूर्तमुपपतिं मानं विमुच्य समालिलिङ्ग आश्लिष्टवती इति कैरलीटीका।
द्वादशशताब्द्यां कलिकालसर्वज्ञाचार्यश्रीहेमचन्द्रसूरिविरचिते द्वयाश्रयमहाकाव्ये–

इभ्यपोटेभ्ययुवतिवत्तस्थुर्दूरतस्तयोः।
वृता हयकतिपयैर्गजस्तोकैश्च भूभुजः[22]।।

इभ्यपोटेभ्ययुवतिवदिभ्या हस्तिन्यः स्त्रीजातिभेदः। कामशास्त्रे हि पीनस्तनत्वसूक्ष्माक्षत्वादिहस्तिनीधर्मोपेता स्त्री हस्तिनीत्युच्यते। पुरुषवेशधारिण्यः स्त्रियः पोटा इति अभयतिलकगणिटीका।

3. 'सिद्धशुष्कपक्वबन्धैश्च'[23] इत्यत्र प्राचीनोदाहरणपरम्परायां 'चारकबन्धः' इत्युदाहरणम् आसीत्। चान्द्रवृत्तौ भाषावृत्तौ चापि इदमुदाहरणं लभ्यते। प्रथमशताब्द्यां रचिता चान्द्रवृत्तिस्तु काशिकातोऽपि प्राचीना अस्ति। भाषावृत्तिस्तु द्वादशशताब्द्यां रचिताभूत्। काशिकावृत्तौ इदमुदाहरणं प्रस्तुतसूत्रे तु न पठ्यते परन्तु अन्यत्र 'अधिकरणे बन्धः'[24] इत्यत्र 'चोरकबन्धं बध्नाति' इत्येवं रूपेण पठ्यते। आधुनिकाः सम्पादकाः व्याख्यातारश्चापि एतादृशमेव पाठं मत्वा उदाहरणमर्थापयन्ति।
वस्तुतः काशिकायामयम् अपपाठ एव। शुद्धपाठस्तु चारकबन्धः। 'चारकबन्धं बध्नाति' चारके बन्धः चारकबन्धः इत्येवास्ति। 'सिद्धशुष्कपक्वबन्धैश्च' इत्यत्र चान्द्रवृत्तिगतेन भाषावृत्तिगतेन पाठेन इदं तथ्यं स्पष्टं भवति। सिद्धहेमशब्दानुशासने बृहद्वृत्तौ अपि अयमेव पूर्वसूचितः शुद्धपाठ एव लभ्यते। इममेवार्थं पुरस्कृत्य कविभिर्प्रयोगाः अपि कृताः।
अर्जुनरावणीये–

हस्तग्राहं गृहीता ये क्षीणास्त्राः समरेऽमुना।
चक्रबन्धं स्थिता बद्धाः स्वपोषं पोषिताश्चिरम्[25]।।
तयोः शरेजप्रकरप्रवाहपर्यन्तभागेषु निषिद्धपाताः।
वेगेन कृत्वा दिवि चक्रबन्धं भ्रेमुर्गणाः संयति खेशयानाम्[26]।।

कोशेषु चारकशब्दः कारापर्यायः। एतेन स्पष्टं यत् यः चारके कारागारे बन्धः स एव चारकबन्धः। 'चोरकबन्ध' इति पाठस्तु भ्रान्तिपूर्णः।

4. 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम्[27] इति सूत्रे काशिकावृत्तौ चोरस्योन्नाटयति, वृषलस्योन्नाटयति इति उदाहरणद्वयं दृश्यते। अत्र उन्नाटयति इति हिंसार्थको धातुरस्ति। हिंसा च किंरूपा इति प्रयोगादेव स्पष्टतया ज्ञातुं शक्यते। चतुर्भाणीनामके प्राचीनग्रन्थे 'उन्नाटयति' इत्यस्य प्रयोगो लभ्यते। तत्र हि इदं वाक्यमस्ति 'उन्नाटयतीव लाटानाम्' लाटाः अर्थात् लाटदेशवासिनः यथा सानुनासिकम् उच्चारणं कुर्वन्ति तथा तेषामनुकरणं कृत्वा तान् खेदयति। एतदेव राजस्थानभाषायां 'कूंट कढाना' इति उच्यते। एतेन प्रतीयते यत् एतस्य उदाहरणस्य प्रयोगः तस्मिन्नेवार्थे अस्तीति। चतुर्भाणी खलु प्राचीनरचना अस्ति। गुप्तकाले सा रचिताभूत्। अतः तस्याः प्रयोगः प्रामाणिकः मन्तव्यः।

5. 'जनिकर्तुः प्रकृतिः'[20] 'शृङ्गाच्छरो जायते' इति उदाहरणस्यार्थं व्याख्यातारः इत्थं वदन्ति शृङ्गात् बाणः जायते। परन्तु हरमेखलायाम् एतस्य उदाहरणस्यार्थः भिन्नरूपेण प्रतिपादितः–

उत्पलमनवगोमयजलाद् दूर्वापि सुरभिलोम्नः।
शृङ्गाच्छरो जायते करवीरः कुमुदबीजात्।।[29]

तद्वदेव शृङ्गात् सुरभिसम्बन्धिन एव शरस्तृणविशेषः। एतेन स्पष्टं यत् शृङ्गात् शरः तृणविशेषः (सरकण्डा) जायते इति वास्तविकार्थः।
इत्थं निर्दिष्टानां भ्रान्तीनां निवारणम् आवश्यकमस्ति, अन्यथा आधुनिकाः व्याकरणस्य अध्यापकाः अध्येतारश्च भ्रान्तियुक्ताः भविष्यन्ति।

**संदर्भ ग्रथः**


1. महाभारत टीका शान्तिपर्व– 232.34 (चित्राशाला प्रेस पूना संस्करण–शकाब्द–1854)
2. काव्यादर्शः– प्रथमः परिच्छेदः, 3
3. वाक्यपदीयम्– ब्रह्मकाण्डम्, 123
4. वाक्यपदीयम्– ब्रह्मकाण्डम्, 132
5. तैत्तिरीयसंहिता– 6.4.7
6. महाभाष्यम्– पस्पशाह्निकम्
7. सिद्धहेमशब्दानुशासनम्, बृहद्वृत्तिः– (1.1.2)
8. उणादिकोशः– 4.141
9. महादेववेदान्तकृतोणादिकवृत्तौ– 4.14
10. जैनेन्द्रव्याकरणमहावृत्तिः– 1.3.27, पृ.–51
11. शाकटायनव्याकरणचिन्तामणिवृत्तिः– 2.1.36, पृ.–169
12. अष्टमः पादः सूत्र– 13, पृ.–114
13. पूर्वार्धम्, तत्पुरुषप्रकरणम्, पृ.–279
14. समासविन्यासः– पृ.–128
15. 2.2.16 पृ.–191
16. कातन्त्रपरिशिष्टम् (2 सूत्र– 71 द्वितीयो भागः द्वितीयखण्डः)
17. द्वयाश्रयमहाकाव्यम्, प्रथमभागः, 3.10 पृ.–215
18. भैमीव्याख्या पृ.–65
19. व्याकरणचन्द्रोदयम्, प्रथमखण्डः, समासप्रकरणम् पृ.–91
20. अष्टा.– 2.1.65
21. अर्जुनरावणीयम्– 4.50
22. द्वयाश्रयमहाकाव्यम्– 5.89
23. अष्टा.– 2.1.41
24. अष्टा.– 3.4.41
25. अर्जुनरावणीयम्– 13.21
26. अर्जुनरावणीयम्– 19.9
27. अष्टा.– 2.3.56
28. अष्टा.– 1.4.30
29. हरमेखला– 1.2.3